# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-3)(New&Old)** | **प्रश्नपत्रम् – 6** | गुणाः –70 |
| विषयः – सर्वदर्शनम् | **कोड –C.C.2.3.6** | समयः- 8 तः 11 |
| दिनाङ्कः –15/10/2019 | सन्दर्भग्रन्थः – न्यायसिद्धान्तमुक्तावली | |

### प्रथमान्वितिः (Unit 1)

**प्रश्न १ अधोलिखितासु कारिकासु द्वयोः कारिकयोः यथाग्रन्थं व्याख्या क्रियताम्।** १०

१ उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा।
प्रसारणं च गमनं कर्माण्येतानि पञ्च च॥

२ सामान्यं द्विविधं प्रोक्तं परं चापरमेव च।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते॥

३ घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः॥

**प्रश्न २ अधोलिखितेषु कस्यचिदेकस्य निबन्धात्मकम् उत्तरं प्रदीयताम्।** १०

१ मुक्तावल्याः मङ्गलाचरणं व्याख्याय मङ्गलस्य समाप्तिसाधनत्वं प्रतिपादयत।

२ न्यायदर्शनरीत्या द्रव्यविभागं विशदयत।

### द्वितीयान्वितिः (Unit 2)

**प्रश्न ३ अधोलिखितासु कारिकासु द्वयोः कारिकयोः यथाग्रन्थं व्याख्या क्रियताम्।** १०

१ अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च॥

२ सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः।
पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥

३ समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्।

गुणकर्ममात्रवृत्ति ज्ञेयमथाऽप्यसमावायिहेतुत्वम्॥

**प्रश्न ४ अधोलिखितयोः कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

१ अन्यथासिद्धिविषये निबन्धमेकम् आरचयत।

२ द्रव्याणां साधर्म्यवैधर्म्ययोः प्रतिपादनं कुरुत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोलिखितासु कारिकासु द्वयोः कारिकयोः यथाग्रन्थं व्याख्या क्रियताम्।** १०

१ द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम्।
अव्यप्यवृत्तिः क्षणिको विशेषगुण इष्यते॥

२ संख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे।
परापरत्वे संख्याद्याः पञ्च वेगश्च मानसे।।

३ तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता।
षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः॥

**प्रश्न ६ अधोलिखितयोः कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

१ यथाग्रन्थं पृथिवीलक्षणं तत्स्वरूपं च चर्चयत।

२ विशेषगुणान् निबध्नीत।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानाम् लघूत्तराणि लिखत।** १०

१ ग्रन्थकारः मङ्गलाचरणं ग्रन्थतः किमर्थं निबध्नाति?

२ भावपदार्थाः कति सन्ति? के च ते?

३ 'देही' इति पदस्य कोऽर्थः?

४ आत्ममात्रविशेषगुणाः कति सन्ति?

५ जातिबाधकसङ्ग्रहः कः अस्ति?

६ को नाम विशेषः?

७ द्रव्यणि कति सन्ति? कानि च तानि?

८ को नाम अन्योन्याभावः?

९ किं नाम साधर्म्यम्?

१० किं नाम वैधर्म्यम्?

११ कारणं कतिविधम्? के च ते भेदाः?

१२ समवायिकारणत्वं कस्य विज्ञेयम्?

१३ न्यायदर्शनस्य प्रवर्तकः कः?

१४ न्यायसिद्धान्तमुक्तावली केन विरचिता?

१५ रसः कतिविधः?